(Accredited by NAAC with 'A' Grade)

# राष्ट्रिय संस्कृत-संस्थानम् मानितविश्वविद्यालयः, लखनऊ परिसरः

(मानव संसाधन विकास मंत्रालय, भारत सरकार के अधीन)

## RASHTRIYA SANSKRIT SANSTHAN Deemed University, Lucknow Campus

(Established under the auspices of the Ministry of Human Resources Development, Govt. of India)

क्रमांक : रा.सं. सं. ल. प./ दिनांक : ..........................

## द्विदिवसीय-साहित्यशास्त्रीय-राष्ट्रियसङ्गोष्ठी

**27-28 मार्च 2019**

**विषयः- "काव्ये रसादिविचारः"**

अयि मान्याः,

राष्ट्रियसंस्कृतसंस्थानस्य लखनऊपरिसरे द्विदिवसीया (27-28 मार्च 2019) साहित्यविभागीया राष्ट्रियशोधसङ्गोष्ठी 'काव्ये रसादिविचार' मधिकृत्य समायोजिता भविष्यति। रसादिरिति रस-भाव-तदाभास-भावशान्त्याद्यभिधानः। स चासंलक्ष्यक्रम-व्यङ्ग्यरूपः। काव्ये रसाभावादेः स्वरूपं विभावादिहेतुमत्त्वं महन्महत्त्वं काव्यात्मत्वं ध्वनित्वमलौकिकत्वं चेति,रसगणनापराणि मतानि रसोत्कर्षकापकर्षकराणि काव्यतत्त्वानि चेत्यहो सुमहानेव रसविषयस्तथापि तन्मुखेन काव्यगतं स्वारस्यं यथाकालं विचारणीयमेव। अधुनातने काव्यलोके कियान् रसपरिपाक इति कथमन्यथा ज्ञायेत । भक्तेर्भावत्वं रसत्वं वेति विवादोऽपि यथाशक्यं समाधेय एव। रसभावयोःकथं पार्थक्यं कथमपार्थक्यमित्यपि तयोर्बलाबलत्वं चेत्यपि विचारणीयम्। रसभावपरिग्रहे साधारणीकरणमपि विचारमर्हति। अथवा काव्यशास्त्रे सुस्थिरीकृतोऽपि रसादिविषयः प्रत्यग्रतया प्रभावकारि स्यादिति धिया निम्नाङ्कितविषयोपविषयेषु कमप्येकमधिकृत्य नातिह्रस्वं नातिदीर्घं शोधलेखं विनिर्माय गोष्ठीमध्ये परिपठितुं भवन्तो विद्वांसः शोधपराश्छात्राश्चापि ससम्मानं सप्रश्रयं निवेद्यन्ते।

## मुख्यविषयः- काव्ये रसादिविचारः

उपविषयाः- (क) रससूत्रविमर्शः (ख) नाट्यशास्त्रे रसाध्यायः (ग) नाट्यशास्त्रे भावाध्यायः (घ) न रसादृते कश्चिदर्थःप्रवर्तते
(ङ) भक्तेर्भावत्वं रसत्वं वा (च) रसो वै सः (छ) साधारणीकरणम् (ज) रसभावयोःपार्थक्यापार्थक्ये विनिगमकम्
(झ) अनौचित्यादृते नान्यद् रसभङ्गस्य कारणम्

-पञ्जीकरणप्रपत्रप्राप्तिस्थानम्, साहित्यविभागः राष्ट्रियसंस्कृतसंस्थानम् विशालखण्डः 4, गोमतीनगरम्, लखनऊ-226010, अथवा <u>www.rskslucknowcampus.org</u> इति वेब साईड माध्यमेन डाउनलोड कृत्वा परिपूर्य अणुयन्त्रोपरि (ईमेलोपरि) <u>kavyarsks@gmail.com</u> अथवा Whatsapp-9450530774 इति चलभाषोपरि प्रेषणीयम्।

-शोधपत्रस्य भाषा संस्कृतं, हिन्दी, आङ्ग्लम् वा भवितुमर्हति।

-संगोष्ठ्यां भागग्रहीतारः मार्गव्यय- आवासभोजनादिव्यवस्थां स्वयमेव करिष्यन्ति।

(प्रो. रामलखनपाण्डेयः)
संयोजकः
चलभाषः-9532100121,9415521230, 9450530774

(प्रो.विजयकुमारजैनः)
प्राचार्यः

# राष्ट्रियसंस्कृतसंस्थानम्

(मानितविश्वविद्यालयः)

## लखनऊपरिसरः

## साहित्यविभागः

# द्विदिवसीय-साहित्यशास्त्रीय-राष्ट्रियसङ्गोष्ठी

**(27-28 मार्च 2019**

**मुख्यविषयः- काव्ये रसादिविचारः**

**उपविषयाः- (क) रससूत्रविमर्शः(ख) नाट्यशास्त्रे रसाध्यायः**(ग) नाट्यशास्त्रे भावाध्यायः(घ) न रसादृते कश्चिदर्थःप्रवर्तते (ड़ ) भक्तेर्भावत्व□रसत्व□वा **(च) रसो वै सः ( छ ) साधारणीकरणम् (ज) रसभावयोःपार्थक्यापार्थक्ये विनिगमकम् (झ) अनौचित्यादृते नान्यद् रसभङ्गस्य कारणम्**

**नाम-..............................................................................**

**शोधपत्रस्य विषयः-.........................................................**

**संस्थासंकेतः-...................................................................**

**पदम्- प्रो./डा./शोधच्छात्रः/शोधच्छात्रा-...........................................**

**चलवाणी संख्या-...............................................................**

**ई-मेल-............................................................................**

**दिनाङ्कः -** **हस्ताक्षरम्**

**.................** **.................**